व्याप्यवृत्ति-साध्यके प्रतियोगि-वैयधिकरण्यस्यानुपादानादाह "अव्याप्यवृत्ती"ति। कालिक-सम्बन्धेन व्याप्यवृत्तिश्चाकाशाभावादिरेव, कालिकतया (१) प्रतियोग्यनधिकरण-कालावच्छेदेन दैशिक-सम्बन्धावच्छिन्न-घटाभाववत् दैशिकतया प्रतियोग्यनधिकरण-देशावच्छेदेनैव कालिक-सम्बन्धावच्छिन्नाभाव-सत्त्वात्, न चाकाशाभावस्य दैशिकतयाऽनधिकरणमस्ति, केवलान्वयित्वात्। कालिकतया तदनधिकरणस्यात्मादेः सत्त्वेऽपि काले तदवच्छेदेन तदभावासम्भवात्। आत्मनीदानीमाकाशाभाव इति प्रतीत्या

---

प्रविष्टत्वेन सम्बन्धेन विशेष्यञ्च वर्त्तते, अन्यथा गुणेऽपि गुणकर्म्मान्यत्व-विशिष्ट-सत्ताधिकरणता-प्रतीत्त्यापत्तेः। तथाच कथं महाकाले महाकालान्यत्वविशिष्ट-घटाधिकरणतासम्भवः ? तत्र सामानाधिकरण्यप्रविष्ट-दैशिकविशेषणता-विशेषेण महाकालभेदासत्त्वात्। न च तादृशनियमेऽङ्गीकृते सामानाधिकरण्यसम्बन्धेन दण्डविशिष्टपुरुषस्य कथं ज्ञानेऽधिकरणत्वं; तत्र सामानाधिकरण्यप्रविष्टविशेषण सम्बन्धेन संयोगेन दण्डस्य ज्ञानेऽसत्त्वात्, तथाचैवं नियमद्वयं कर्त्तव्यं, यत्र विशेषण-विशेष्ययोः सम्बन्धस्तत्र, यत्र च विशेष्यसम्बन्धेनैव विशेषणविशेष्योभयं तत्रापि च विशिष्टाधिकरणत्वमिति; एवञ्च महाकालान्यत्वविशिष्टघटोऽपि महाकाले वर्त्तते, विशेष्यसम्बन्धेन कालिकेन भेदस्य घटस्य च तत्र सत्त्वादिति वाच्यं दण्डविशिष्टपुरुषाधिकरणता ज्ञाने न स्वीक्रियते अपि तु दण्डोपलक्षित-पुरुषाधिकरणतैव, तथाच द्वितीयनियमो नाङ्गीकर्त्तव्यः, तथाच महाकाले कथं तादृशघटाधिकरणत्वमिति चेन्न सर्व्वत्र महाकाल एवाधिकरणम्, इदानीं घट इत्यादिप्रत्ययेनापि महाकाल एवाधिकरणत्वेन विषयी क्रियते खण्डकालस्तावदवच्छेदकत्वेनेति, तथाच कालिकेन महाकालो न महाकालभेदविशिष्ट-घटाधिकरणं लीलावतीकारादिसम्मतत्वादेवञ्च तादृशघटाधिकरणमप्रसिद्धमेवेति प्रतियोग्यधिकरणाप्रसिद्ध्या महाकालो घटवानित्यत्राव्याप्तिर्दुर्व्वारैति विभावनीयम्।

(१) कालिकविशेषणतया इति ग।

भावमात्र-वृत्तिरपि घटध्वंस-भिन्नत्व-प्रकारक-प्रमा-विषयत्वाभावो-ऽतिरिक्तः स्वीकार्य्यः (क) एतदस्वरसेनैव (ख) वा "वदन्ती"ति ।

केचित्तु जलान्यत्व-विशिष्ट-सत्ताभावादिना (ग) पूर्व्वोक्तदोषोद्धाराय स्वसमानाधिकरणात्यन्ताभाव-प्रतियोगितावच्छेदकावच्छिन्न-प्रतियोगिताकाभाववत्त्व-व्यापक-साध्यतावच्छेदकावच्छिन्न-साध्य-समानाधिकरण-वृत्तित्वकत्वं समुदित-लक्षणार्थः । ननु घटध्वंसो ध्वंसत्वादित्यत्र ध्वंसत्व-समानाधिकरणात्यन्ताभाव-प्रतियोगितावच्छेदकं घटध्वंसत्वत्वं तदवच्छिन्न-प्रतियोगिताकाभाववत्त्वञ्च(घ) परम्परासम्बद्धं (१) घटत्वमनुगतं घटध्वंसत्वाभावाधिकरण-घटध्वंसत्वाभावात्मक-पटाभावादि-निष्ठम्, एवं घटध्वंसत्व-प्रकारक-प्रमा-विषयत्वाभाववत्त्वमपि अभावाधिकरणकाभाव-वृत्तितया नाधिकाभाव-वृत्ति, तस्य च घटध्वंसत्व समानाधिकरण-पटाभाव-वृत्तित्वान्निरुक्त-रूप-सत्त्वेनातिप्रसङ्ग इत्यत आह "घटध्वंसत्व" इति व्याचख्युः । तत्तुच्छम् अभावे भाव-भिन्नत्व-विवक्षण-वैयर्थ्यात् ।

(१) परम्परासम्बन्धेनेति ख ग ।

(क) अन्यथा घटध्वंसात्मकस्य तस्यात्यन्ताभावत्वाभावेनान्यादृशस्य साध्यसामानाधिकरण्येनातिव्याप्तेरिति भावः ।

(ख) अभावमात्रवृत्त्यभावस्यातिरिक्तत्वेऽपसिद्धान्त इत्यत आह "एतदस्वरसेनैवे"त्यादि, उक्तभेदसाध्यकातिव्याप्तिदोषेणैवेत्यर्थः ।

(ग) जलान्यत्वविशिष्टसत्ताभाव-तेजोऽन्यत्वविशिष्टसत्ताभावान्यतराभावाभावेत्यर्थः ।

(घ) परम्परासम्बन्धश्च स्वाश्रयप्रतियोगिकत्वविशिष्टध्वंसत्वाभावतादात्म्यरूप इत्यर्थः ।

